PAPER - 5

# MT

2017 .... .... 1100

Seat No. | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - V**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

---

**प्रथमः विभागः - गद्यम् ।**

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

कुमारः अधिकमूल्यं दत्त्वा चित्रपटप्रवेशपत्राणि क्रेतुं सूचयति, यतः ................ ।

१) सः चित्रपटं प्रेक्षितुम् अतीवोत्कण्ठितः ।

२) सः जानाति यत् तस्य मित्रेण अपि तेन मार्गेण प्रवेशपत्राणि क्रीतानि ।

(ii) पूर्णवाक्येन उत्तरत । १

कुमारः कस्मिन् दिने चित्रपटं प्रेक्षितुं गन्तुं इच्छति ?

(iii) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

मित्राणाम् अवैधाचरणस्य अनुकरणं करणीयम् ।

| | | |
|---|---|---|
| कुमारः | - | तात, अप्यद्य वयं सर्वे राष्ट्रीयपुरस्कारप्राप्तं चित्रपटं प्रेक्षितुं गच्छामः ? |
| जनकः | - | जात, किन्तु चित्रपटस्यास्य प्रवेशपत्राणि सद्यः नोपलभ्यन्ते इति श्रुतं मया । अद्य तु रविवासरः । तर्हि किमु व्यक्तव्यम् ? |
| कुमारः | - | जानामि तत्सर्वं, किन्तु अधिकमूल्यं दत्त्वा प्रवेशपत्राणि लभ्यन्ते । |
| जनकः | - | सौम्य, कथं त्वया ज्ञायते ? |
| कुमारः | - | वयस्येन कथितम् । तेनापि तथा क्रीतानि । वयमपि तथैव करिष्यामः । |
| जनकः | - | पुत्र, अपि जानासि त्वं यद् असावनुचितः मार्गः ? एष अवैधाचारः । |
| कुमारः | - | श्रुतः मया शब्दोऽयम् । किन्तु तस्य समग्रार्थः न ज्ञातः । |
| जनकः | - | श्रृणु तर्हि । केवलं स्वार्थसिद्धये अनुष्ठितं विधिविरुद्धमाचरणं नियमातिक्रमणं, निषिद्धाचरणं नाम अवैधाचारः । |
| कुमारः | - | स्वकार्यस्य सत्वरसिद्ध्यर्थं केचन जनाः तेषु तेषु कार्यालयेष्वधिकमूल्यं ददति इति श्रुतं मया । किमेष अवैधाचारः ? |
| जनकः | - | अथ किम् । महानेष अपराधः । यतः तेन विधिभङ्ग भवति अवैधाचारेण भ्रष्टजनानां कार्यसिद्धिः भवति किन्तु तेन जनसामान्याः स्वाधिकारवञ्चिताः भवन्ति । कार्यसिद्ध्यर्थं वैधाचारः उचितः । अतः कस्यापि वस्तुनः निश्चितमूल्यं दत्त्वैव क्रयणमुचितम् । |

**२. स्वमतप्रकटनम् ।** २

अवैधाचारः किमर्थं न कर्तव्यः इति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

यात्री सदाचरणविषये चिन्तयति यतः .......... ।

१) सः पापात् भीतः । २) पुण्यस्य सञ्चयः करणीयः ।

(ii) कः कं वदति । १

अस्य पापस्य किं करोषि ?

(iii) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

मेघः जीवनस्य दाता ।

तच्छ्रुत्वा अतीवोत्कण्ठितः स सागरतीरे स्थित्वैव अवलोकयितुमारब्धवान् । तेन दृष्टं तस्य बाष्पस्यैव मेघो भवति । अतः स यात्री मेघं पृष्टवान्, रे मेघ, अस्य पापस्य किं करोषीति मेघः भणितवान्, न किमपि करोमि । अहं तु जीवनदाता । जीवनं स्वकर्माधिष्ठितम् । अतः यस्य यत्पापमस्ति तत्तस्य गृहशिखरे वृष्टिरूपेण पातयामीति । एतन्निशम्य यात्री मनस्यकरोत् यद् उचितप्रायश्चित्तं विना पापान्मुक्तिरशक्या । अतः सत्कर्मानुसरणमेव सर्वथा श्रेयस्करमिति ज्ञातमधुना मया ! जीवने सदाचारी भूत्वैव पुण्यसञ्चयं करिष्ये। पापाचरणं कृत्वा तस्य भारं न कस्मा अपि दास्ये इति विचिन्त्य प्रशान्तमनसा स स्वगृहमगच्छत् ।

**२. पृथक्करणम् ।** २

**उचितपर्यायं चित्वा जलचक्रं पूरयत ।**

(मेघः, जलम्, वर्षा, बाष्पम्)



**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) चतुर्थपदं लिखत । १

१) अनल्पा : अल्पा :: अनुपमेयम् : ........... ।

२) न्यूनम् : अधिकम् :: प्रारभे : ........... ।

(ii) विशेषण - विशेष्य - अन्वितिः । १

१) ..........., ........... ॲम्फी थिएटरम् ।

२) ..........., ........... भित्तिः ।

(iii) विभक्त्यन्तपदानां चयनम् । १

सप्तमीविभक्तेः एकवचनस्य रूपद्वयं लिखत ।

प्रथमाश्चर्यं रोमनगरभूषणं कोलोसिअम् - फेव्हिन - अम्फीथिएटरम् एतद् अर्धवर्तुलाकारं प्रेक्षागृहं सम्राट्-व्हेस्पॅशियनमहोदयेन निर्मितम् । द्वितीयमाश्चर्यं नाम चीनदेशस्थिता मृत्पाषाणेष्टिकामयी विशाला भित्तिः । उत्तरकाष्ठास्थितशत्रोः रक्षणार्थं शिंगहाउन-टी-नृपेण निर्मितैषा । त्वं जानास्येव । यद् मिस्रदेशः पिरॅमिडरचनार्थं जगति विख्यातः । एतासु पिरॅमिडरचनासु गिझापिरॅमिडरचना सप्ताश्चर्येषु एकतमा । एतदभिमानास्पदं यद् चतुर्थाश्चर्यं भारतभूमावेव स्थितम् । शाहजहानसम्राजा स्वपत्नीस्मरणार्थं विनिर्मितमेतत् शिल्पं भारतीयस्थापत्यकलायाः अनुपमेयं प्रतीकम् । पौर्णिमायां रात्रौ चन्द्रज्योत्स्नाधवलितस्यैतस्य ताजमहालस्य शोभा अवर्णनीया केवलं स्वसंवेद्या च । पञ्चममाश्चर्यं नाम ब्राझिलदेशे 'रिओ-डि-जानिरोनगरसमीपे पर्वतस्थः ख्रिस्त-दि-रिडिमर' इति पुत्तलः । रिडिमर नाम तारकः एषः क्रुसाकारे विराजते । मेक्सिकोदेशे विराजमाना 'मायासंस्कृतेः प्रतीकरूपा 'चिचेन् इट्झा' नाम पुरातनी नगरी विश्वस्य षष्ठाश्चर्यम्। अपि ज्ञायते त्वया यद् मायासंस्कृतिरतिप्राचीना विकसिता चासीत् । जार्डनदेशस्था प्राचीना नगरी पेट्रा आश्चर्यगणेषु सप्तमा । रक्तसमुद्रमृतसमुद्रयोः मध्यप्रदेशे विकसितैषा नगरी महत्त्वपूर्णं व्यापारकेन्द्रमासीत् । वस्तुतः एकैकमाश्चर्यमनुसृत्य अन्तर्जालतोऽनल्पं ज्ञातव्यमस्ति, किन्तु अद्याहं बहुकार्यव्यापृता । अतः अन्तर्जालतः यद्यधिकं ज्ञातव्यं स्यात्तर्हि एतानि सङ्केतस्थलानि निर्दिशामि - यथा www.wikipedia.com/ www.answer.com. आदीनि । तव प्रकल्पार्थं शुभाशंसाः । अधुना एतदेवालम् ।
अत्र विरमामि ।
शुभदिनम् ।

२. **पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

(i) वरदां प्रति अन्तर्जालात् प्राप्तसंज्ञापनस्य प्रेषणम् ।

(ii) प्रभाते सन्देशप्राप्तिः ।

(iii) समाजशास्त्रविषयस्य प्रकल्पार्थं सप्ताश्चर्यविषये जिज्ञासा ।

(iv) सप्ताश्चर्यविषयकज्ञानार्थम् अन्तर्जालस्य उपयोगः ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् ।
रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च ॥१॥
यत्रोत्साहसमारम्भो यत्रालस्यविहीनता ।
नयविक्रमसंयोगस्तत्र श्रीरचला ध्रुवम् ॥२॥

१. **पृथक्करणम् ।** २

(रोगस्य, जीवितस्य, श्रेयसः, वैद्यस्य, धर्मस्य, मोक्षस्य)




२. **शब्दज्ञानम् ।**

पद्यांशात् चित्वा विलोमपदं लिखत। १

(१) अनालस्यम् × ........ । (२) चला × ........ ।

**प्र.२ ब) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

पारीनगर्याः खलु कण्ठभागे मालेव सीनाख्यनदी सुलग्ना ।
महासुखं यत्र जना लभन्ते नौकाविहारस्य तटभ्रमैश्च ।।१।।
समीपमाराधनमन्दिरं च सेन्ट्-चेपलं विश्रुतमस्ति नाम ।
मूर्ध्नोऽस्य तीक्ष्णस्तनुरग्रभागो नभस्थितं दर्शयतीव देवम् ।।२।।
यस्यामनेका खलु सेतुबन्धैः विराजते सीनसरित्सुबद्धा ।
नदीं पुरी सापि नदी पुरीञ्च परस्परं भूषयतोऽत्र मन्ये ।।३।।

१. **अवबोधनम् ।**

पूर्णवाक्येन उत्तरत । १

सीननदीतटे जनाः किं लभन्ते ?

२. **स्वमतप्रकटनम् ।** २

युष्माकं प्रियपर्यटनस्थलविषये माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् । (केवलं १ श्लोकः लेखनीयः ।)** २

**सुभाषितं शुद्धं पूर्णं च लिखत ।**

(i) एकैकं ....... ०बाधयन् ।।

(ii) पात्रापात्र० ....... विषम् ।।

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | |
|---|---|
| (i) भोजनान्ते पिबेत्तक्रं | १) तत्र श्रीरचला ध्रुवम् । |
| (ii) अद्रोहः सर्वभूतेषु | २) वासरान्ते पिबेत् पयः । |
| (iii) तस्मान्नरो वह्निविवर्धनाय | ३) कर्मणा मनसा गिरा । |
| (iv) नयविक्रमसंयोगः | ४) मुहुर्मुहुर्वारि पिबेदभूरि । |
| | ५) निशान्ते च पिबेद्वारि । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | तृतीया एकवचन | सप्तमी बहुवचन | प्रथमा एकवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(राज्ञी, एतासु, साम्ना, शाखासु, भवान्, अनेन)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | विध्यर्थः | वर्तमानकालः | आज्ञार्थः |
|---|---|---|---|---|---|
| | | | | | |

(धारयेत्, मन्ये, आसीत्, जगाम, करिष्ये, श्रुणु)

**इ) समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| | **विग्रहवाक्यानि** | **समासनामानि** |
|---|---|---|
| (i) | काशी नाम नगरम् । | उपपद - तत्पुरुषः । |
| (ii) | अर्थम् अनुसृत्य । | नञ् - तत्पुरुषः । |
| (iii) | सुष्ठु विख्यातः । | कर्मधारयः । |
| (iv) | न उचितः । | बहुव्रीहिः । |
| (v) | सत्यमार्गं गच्छन्ति इति । | प्रादि - तत्पुरुषः । |
| (vi) | सीन इति आख्या यस्याः सा । | अव्ययीभावः । |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) ......... समीपे परिमाणानि न सन्ति । (तस्मै / तव / तम्)

(ii) ......... विना कथं चिकित्सकः भवेत् । (सेवाभावाय / सेवाभावेन / सेवाभावः)

(iii) मधुरा माता च ......... गच्छतः । (आपणं / आपणे / आपणात्)

(iv) तेन स्वरवेण मार्गं निर्दिश्यार्जुनः कस्यापि ......... समीपं नीतः ।
(विशालवृक्षम् / विशालवृक्षस्य / विशालवृक्षात्)

(v) अर्जुनः विहारार्थं ......... जगाम । (निबिडारण्यं / निबिडारण्ये / निबिडारण्येन)

(vi) अस्माकं सेना ......... अलम् । (राष्ट्ररक्षणेन / राष्ट्ररक्षणाय / राष्ट्ररक्षणस्य)

उ) **सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) कस्मा अपि = ....... + अपि ।

(ii) ....... = तनुः + अनुभागः ।

(iii) पिबेदभूरि = पिबेत् + ....... ।

(iv) ....... = नद्यः + तत्र ।

(v) उभावपि = ....... + अपि ।

(vi) अस्यैव = अस्य + ....... ।

ऊ) **सङ्ख्यावाचकविशेषणानि । रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) ....... शान्तचेतसं दृष्ट्वा नागार्जुनेन पृष्टम् । (second)

(ii) कबड्डीक्रीडायां सातत्येन ....... सुवर्णपदकं प्राप्य विश्वविक्रमः प्रस्थापितो भारतदेशेन । (thrice)

(iii) श्रावणमासे ....... तिथौ कृष्णजन्म भवति । ($8^{th}$)

(iv) नवरात्रं नाम ....... रात्रीणां समाहारः । (9)

(v) ....... पाण्डवाः प्रसिद्धाः । (5)

(vi) ग्रामस्थाः महिलाः ....... अवकरसङ्ग्रहणं कुर्वन्ति । (2 times)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

अ) **वाक्यनिर्माणम् ।**

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।** ४

| | | |
|---|---|---|
| विस्मितःबालकः | काञ्चन कविताः | दूरं पलायन्ते |
| सर्वे मृगाः | उत्तराणि | पठिताः |
| अस्माभिः | सिंहगर्जनां श्रुत्वा | पृच्छति |
| मन्त्रिमहोदयः | किमपि | ददाति |

आ) **परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

महाराष्ट्रराज्ये रायगडः नाम सुविख्यातः दुर्गः। एकदा हिरकणी दुग्धविक्रयार्थं रायदुर्गं ....... उत्सुका। किन्तु तस्याः शिशुः अद्यापि न सुप्तः। यदा दोलारूढः शिशुः सुप्तः तदा हिरकणी दुर्गं प्रस्थिता। दुर्गे दुग्धविक्रयार्थं अधिकः ....... अभवत्। सूर्ये अस्तमिते दुर्गद्वाराणि पिहितानि। आवृत्तं महाद्वारं विलोक्य सा द्वारोद्घाटनाय रक्षापुरुषं प्रार्थयत परं सूर्योदयसमये एव द्वारम् उद्घाटनीयम् इति ....... आज्ञाम् अनुसृत्य सः तद् न उद्घाटितवान्। अस्वस्थचित्ता सा इतस्ततः अभ्रमत्। तस्याः नयनयोः पुरतः केवलं तस्याः शिशुः आसीत्। पुत्रस्नेहेन सा एकस्मात् ....... अवतरणं प्रारभत सुदूरम् उत्प्लुत्य भूमौ न्यपतत् गृहं च अगच्छत्। शिवभूपेन तस्या न केवलं प्रशंसा कृता तस्यै पारितोषिकमपि दत्तम्।

(कालक्षेपः, तटात्, गन्तुम्, शिवभूपस्य)

**Best of Luck**